BĪJOPANAYA

(A treatise on the corrections of the moon)

BY

BHĀSKARĀCĀRYA

WITH

HIS OWN COMMENTARY NAMED

VĀSANĀBHĀSHYA

AND

TITHINIRNAYAKĀRIKĀ

BY

DIKSHITA

WITH

AN INTRODUCTION TO BĪJOPANAYA

BY

Ekendranath Ghosh, M. Sc., M. D., etc.,

PROFESSOR OF BIOLOGY, MEDICAL COLLEGE,

Calcutta.

***

PUBLISHED BY

MOTI LAL BANARSI DAS,

Proprietors,

The Punjab Sanskrit Book Depot,

LAHORE.

1926.

PUBLISHED BY
MOTI LAL BANARSI DAS,
Proprietors,
The Punjab Sanskrit Book Depot,
SAIDMITHA STREET,
LAHORE.

(All Rights Reserved by the Publishers).

1926.

PRINTED BY
AMAR NATH "RAUNAK"
Manager,
The Bombay Sanskrit Press,
SAIDMITHA STREET,
LAHORE.

Introduction.

The Bijopanaya of Bhāskarācāryya is now printed for the first time from an old manuscript perhaps hitherto unknown to the scientific world. Although the other works of this great astronomer are quite extant and have been handed down to us, the present work does not seem to have been known even by name only. So far we find from the available literature, this work is neither mentioned nor has been found any-where before. The reason why this work has been unknown so long, is probably to be found in the 58th sloka, where the author, following the ideas of the ancient astronomers, expresses his will to keep the work very secretly away from the other astronomers.

In the verse 7, the author gives the year of his birth as 1036, Śaka, already known to us. The treatise was finished at the completion of 37 years after his birth. The treatise was composed after the author had written his Siddhānta Śiromani ~~and Karanakutuhala~~; the latter, as we know, was written in 1072 śaka era.

In the introduction to his commentary, the author mentions the name of his practical treatise and considers the present work an appendix to it. He also refers to the short notes on the *bijas* at the end of the chapter Madhyādhikāra of his Siddhānta Śiromani

(Ganitādhyāya) which have supplied materials for the present work. He also discusses the views of several authors on the importance of *bija* and shows its necessity and usefulness.

The author only deals with the corrections of the moon in this small treatise. A summary of the subject matters is appended herewith for ready reference.

Verse 1. The author salutes God.

Verse 2-3. He discusses at length the necessity of calculating the *bija*.

V. 4-5. He gives reasons for giving the corrections of the moon in detail (It is well known that the calculation of the lunar place still presents a difficult problem with the modern astronomers).

V. 6. He points out the difficulty of ascertaining the *bijas* of the (other) planets.

V. 7. He mentions the year of his birth and the year of the completion of his work.

V. 8. The greatest discrepancy between the observed and calculated moon's longitude is given as $1^{\circ}52'$. This is additive or subtractive according to the moon's place.

V. 9-13. He refutes the view (of Mallabhatta-mentioned in the commentary) that the above discrepancy is due to moon's *sighrocca* motion. He shows that the motion in question does not exist in the case of the moon, as it has no retrograde motion like the

sun and unlike the mars and others. He attributes the presence of *bija* in the case of the moon and sun to the difference of time (that is, due to the lapse of a long period after the methods of calculations were enforced by the old astronomers).

V. 14–15. He defines two sorts of *bijas* of the moon—*sthira*, capable of being ascertained by the aid of science only, and *cara*, obtainable by observations only.

V. 16. There is no difference of opinion regarding the *sthira bija* for any particular time.

V. 17. He discusses how the one sort of *bija* affects the other.

V. 18–19. As *sthira bija* has been considered in Siddhāntaśiromani, he states that he will describe the *cara bija* in the present treatise.

V. 20–25. The author records the differences between the observed and calculated moon's places at certain points: (1) The greatest subtractive difference occurs between the calculated and observed moon's place when the sun remains at a distance of 180° from the moon placed at the end of 90° from its *tunga sthana* (higher apsis). (2) The greatest additive difference occurs when the sun remains at a distance of 180° from the moon situated at 270° at the end of the third quadrant from its *tunga sthana*. (3) There is no bija, when the sun and moon reside together in the *tungasthana* or *nicasthana* (lower apsis)

of the moon. (4) If the moon and sun remain together at the end of odd quadrants from the apogee, the difference becomes 34' subtractive. (5) If the sun and moon are situated at a distance of 180° from each other, one before or after the other, or if the moon remains in its apogee or perigee, the difference becomes 34' additive.

V. 26-28. The 24 quantities of the *bija*, corresponding to 24 sines (*jyardhas* or half chords) are enumerated: 6, 13, 21, 27, 33, 38, 45, 51, 56, 61, 65, 68, 70, 72, 74, 75, 75, 76, 76, 77, 77, 78, 78, 78. These become additive when the *mandaphalas* (the equation of the apsis) become additive, and become subtractive when the *mandaphalas* become subtractive.

V. 29-32. The author gives the second correction. The moon's place obtained by the first correction is to be rectified (subtracted) from the sun's place; if the remainder be in an odd quadrant, the result will be subtractive, and if in an even quadrant, the result will be otherwise. The 24 quantities, corresponding to 24 sines are:—6, 8, 13, 17, 22, 24, 27, 30, 32, 33, 34, 34, 34, 33, 31, 29, 26, 24, 20, 16, 11, 8, 3, 0. The moon's longitude after this second correction is considered suitable for all ceremonial purposes.

V. 33. The author gives reasons for using these numbers for the purpose of corrections.

V. 34. He considers the necessity of corrected moon's longitude.

V. 35. He deals with the usefulness of the planetary positions corrected by observations.

V. 36–43. He discusses the usefulness of corrected moon's place in connection with various matters.

V. 44–50. He describes in detail the construction of a figure of the heavens for the mode of observing and recording the positions of the sun and moon in connection with the determination of the *tithis*.

V. 51. He notes the importance of determining the corrected *tithis* every where.

V. 52. He says that *lambana* correction is not necessary for calculating the *tithis*.

V. 53. He speaks of the necessity of the *abanati* correction.

V. 54–56. He speaks of the divine nature of the planets.

V. 57. He notes that all these corrections should be determined by observations.

V. 58. He speaks of the present science as too secret to be delivered to any person.

V. 59. The author finishes his treatise with due deference to the learned.

CALCUTTA:

EKENDRANATH GHOSH.

The 8th January, 1926.



भास्करीयबीजोपनयः ।

उक्तं सपरिकरं करणं सोपपत्तिकं गणितगोलयोः । इदमत्र परिशिष्टं वक्तव्यं यत् बीजोपनीतिरहस्यप्रपञ्चनम् । तत् हि मध्याधिकारान्ते अत्र वक्ष्यमाणमुपजीव्य संक्षिप्तम् । अत्र केचिन्मुधाभिमानिनो वदन्ति दृक्संवादार्था बीजोपनीतिः आगमैकशरणानामनादरणीयेति । तत्तु "तत्तद्गतिवशान्नित्यं यथा दृक्तुल्यतां ग्रहाः" इत्यादि सूर्योक्तिविरोधादागमैकशरणानामादरणीयमेव । अपरे त्वस्य क्वाचित्कविनियोगात् प्रयोजनमान्द्यं मन्यन्ते। तदपि तिथ्यादिकरणाम्नानप्रकरणविरोधादुपेक्षणीयम् । न हि केनचिदागमेन मध्याध्याये तिथ्याद्यानयनमाम्नातम् । अन्ये तु स्पष्टीकरणमबीजपर्यन्तं मन्यन्ते । तदपि प्रामाणिकैः मध्यग्रह एव बीजोपनयस्यानुष्ठानात् तथैव निबन्धनाच्च प्रतिक्षेप्यम् । इतरे तु अस्तु स्पष्टकरणाय स्थिरबीजोपनयमात्रम्, तथापि न तस्य दृग्गैक्यमावश्यकमिति प्रत्यवतिष्ठन्ते । तदपि 'ग्रहाः यथा दृक्तुल्यतां प्रयान्ति तत् स्फुटीकरणम्' इति सूर्योक्तिविरोधात् असमञ्जसमिति 'स्फुटक्रिया दृग्गणितैक्य मद्य' इति पूर्वमेव दत्तोत्तरम् । एके च बीजोपनयप्रयासभीताः तन्द्रालवो बीजोपनयागमस्य प्रक्षिप्ततामारोप्य अप्रामाण्यमुररीचक्रुः । तन्मतं निर्बीज-

मेवेति नाद्रियामहे । वक्ष्यमाणरीत्या तदुद्भावितप्रक्षेपानुमानानां तर्काभासत्वात् । अपरे त्वविस्रब्धा गणितागमानां तथा तथा नानाप्रकारपाठश्रवणात् बीजोपनयस्य हानमुपादानं वा किमादर्तव्यम् इत्यान्दोलितहृदया भवन्ति । ते च भगणवासनायामस्मदुक्तरीत्या सांप्रतोपलब्ध्यनुसारिणि कस्मिंश्चिदागमे विस्रंभं प्रापणीयाः । उक्तं च 'बीजोपनये उपलब्धिरेव वासनेति' । परप्रत्यनेयबुद्धयः परे च ब्रह्मगुप्ताद्यङ्गीकृतमेव शास्त्रं प्रमाणयन्ति । तेऽपि तेषामप्युपलब्धिशरणतां श्रावयितव्याः । यथाह ब्रह्मगुप्तः 'ज्ञातं कृत्वा मध्यं भूयोऽन्यदिने तदन्तरं भुक्तिः । त्रैराशिकेन भुक्त्या कल्पग्रहमण्डलानयनम्' इति ग्रहज्ञानप्रकारश्च गणिताधिकारे भगणवासनायां स्पष्टीकृतो ऽस्माभिः । अत्रापि दङ्मात्रं प्रदर्श्यते । आदौ तावत् ग्रहवेधार्थं भगोलं ब्रह्मोक्तविधिना विषुवद्वलयक्रान्तिवलयकदम्बद्वयप्रोतवेधवलयादियुक्तं विपुलं गोलयन्त्रं कार्यम् । ततः तत् गोलयन्त्रं द्वादशाङ्गुलशङ्कुच्छायासाधितध्रुवाभिमुखाच्चांशोन्नतयाष्टिकं जलशुद्धक्षितिजवलयं स्थापयेत् । अथ रात्रौ गोलमध्यचिह्नगतया दृष्ट्या रेवतीदक्षिणतारां विलोक्य क्रान्तिवलये यो मेषादिः तं तत्समं निवेश्य मध्यगतयैव दृशा ग्रहं विलोक्य तद्ग्रहोपरि कदम्बप्रोतं वेधवलयं निवेश्यम् । एवं निवेशिते तस्य क्रान्तिवृत्तस्य च यः संपातः तस्य रेवतीतारास्थानस्य च यदन्तरं तावानेव तात्कालिको लम्बनसंस्कृतस्फुटग्रहः । अथ क्रान्तिवृत्तस्य ग्रहबिम्बमध्यस्य च यावदन्तरं, तावानेव तस्य विक्षेपः । ततः पुनः षष्टिघटिकानन्तरं ग्रहः तथैव वेधनीयः । एवं द्वितीयदिने लम्बनसंस्कृतस्फुटग्रहं ज्ञात्वा तयोर्यदन्तरं तत्र वेधनाकालिकं लम्बनखण्डान्तरं प्राक्पाले विशोध्य पश्चात्क-

पाले संयोज्य निष्पादितं यत् तत् तद्दिनस्फुटगतिः। एवम् आभगणान्तं गतयः प्रतिवासरं ज्ञेयाः। अथ यस्मात् तन्त्रात् आनीता ग्रहगतिः तत्तत् ज्ञातगतिसमाना स्यात् तदा तदेव तन्त्रं प्रमाणम्। तदन्यानि कालान्तरे प्रमाणानि भविष्यन्तीत्युपलब्ध्यनुसारी बीजोपनय आवश्यक एव। केचिच्च, सूर्यादिभिः विशेषतोऽनुपदिष्टत्वात् ग्रहणादितोऽन्यत्र बीजकर्म न कार्यमित्याहुः। तद्वचनं वञ्चनामात्रम्। ग्रहणादिष्वपि तत्संस्कारस्य अनुपदिष्टत्वात्। योग्यविषये प्रत्यक्षप्राबल्यं तु तिथ्यादिसाधनोपयुक्ते स्फुटग्रहेऽपि समानम्। तत्तद्ग्रहाणामहरर्द्धेषु तेषामपि प्रत्यक्षसिद्धत्वात्। तस्मात् बीजोपनयस्यावश्यकत्वात् गणितगोलयोः प्रणयनानन्तरं चरबीजस्य तदुभयसापेक्षत्वाद्धेतोः इदानीं बीजोपनयः कर्तव्य इति संगतिः॥

मयाय बीजोपनये यदन्ते
सूर्योक्तमाद्यं परमं रहस्यम्।
प्रकाशये गोप्यमपीह देवं
प्रणम्य बीजं जगतां हितार्थम्॥१॥

अथ बीजोपनयाख्यमधिकारमारभमाणः तदसांगत्यं परिहरन् देवतानमस्कारपूर्वकं सप्रयोजनं प्रतिजानीते मयायेति। बीजोपनये बीजोपनयाध्याये। अन्ते इति असांगत्यशङ्काबीजम्। सूर्योक्तमिति प्रक्षेपशङ्काव्युदासः। तत्र हेतुराद्यमिति। खखाभ्रार्कवर्षपरिमितक्षयवृद्धिकस्य बीजोपनयस्य पुनःपुनः कल्पादिकालात्प्रभृति परिवर्तमानस्य उपलब्धिरूपवासनाया अधुनातनासर्वज्ञदुःसंपादत्वादयं बीजोपनय आगमान्तर्गत एवेति भावः।

तर्हि कुत इदं मध्याध्याय एव नोक्तम् । कुतो वा न प्रश्ने प्रस्तावितमित्यत आह परमं रहस्यमिति । गोप्यतमत्वादेव पृथगुक्तिरिति भावः । न हि गोप्यतमस्य सार्वजनीनमापातदर्शनमस्ति येन प्रश्नेषु तदुपक्षिप्येत । गोप्यतमस्य प्रकाशनमयुक्तमित्यत आह जगतामिति । जगतामित्यस्य बीजमित्यत्राप्यन्वयः । जगत्कारणभूतं देवं प्रणम्य गोप्यमपि जगतां हितार्थं प्रकाशये इति योजना ॥ एतेन केषांचित्तदध्यायानां व्याख्यानमपि व्याख्यातं रहस्यतमत्वेनैव गोपितत्वात् ॥

यद्यपि पूर्वमपीदं संक्षेपा-
दुक्तमागमोक्तदिशा ।
नैतावतैव कश्चित्
दृक्करणैक्याय कल्पते गणकः ॥२॥
दृक्करणैक्यविहीनाः खेटाः
स्थूला न कर्मणामर्हाः ।
अत इह तदर्हतायै
तात्कालिकबीजविस्तरं वक्ष्ये ॥३॥

अथेदानीं विस्तरेण बीजोपनयारम्भस्य प्रयोजनमाह यद्यपीति । पूर्वं मध्यगतिसाधनाधिकारान्ते । "खाभ्रखार्कैर्नता" इत्यादिश्लोकेष्वित्यर्थः । आगमोक्तदिशा "चक्रानुपातजो मध्यो मध्यवृत्तांशजस्फुटः । कालेन दृक्समो न स्यात्ततो बीजक्रियोच्यते ॥ १ ॥ राश्यादिरिन्दुरङ्कघ्नो भक्तो नक्षत्रकक्षया । शेषं नक्षत्रकक्ष्यायाः त्यजेत् शेषकयोस्तयोः ॥ २ ॥ यदल्पं तत्

(१) यल्लब्धं ? ॥

भजेत् भानां कत्त्यया तिथिनिघ्नया । बीजं भागादिकं तत्स्यात् कारयेत्तद्धनं रवौ ॥३॥ त्रिगुणं शोधयेदिन्दौ जिनघ्नं भूमिजे क्षिपेत् । दृग्यमघ्नमृणं ज्ञोच्चे खरामघ्नं गुरावृणम् ॥ ४ ॥ ऋणं व्योमनवघ्नं स्यात् दानवेज्यचलोच्चके । धनं सप्ताहतं मन्दे परिधीनामथोच्यते ॥ ५ ॥ युग्मान्तोक्ताः परिधयो ये ते नित्यं परिस्फुटाः । ओजान्तोक्तास्तु ते ज्ञेयाः परबीजेन संस्कृताः ॥ ६ ॥ वक्ष्मि निर्बीजकानोजपदान्ते वृत्तभागकान् । सूर्येन्द्वोर्मनवो दन्ताः धृतितश्च कलोनिताः ॥ ७ ॥ बाणतर्का महीजस्य सौम्यस्याचलबाहवः । वाक्पतेरष्टनेत्राणि व्योमशीतांशवो भृगोः ॥ ८ ॥ शून्यर्तवोऽर्कपुत्रस्य बीजमेतेषु कारयेत् । बीजं खाग्न्युद्धृतं शोध्यं परिध्यंशेषु भास्वतः ॥९॥ इनाप्तं योजयेदिन्दोः कुजस्याश्वा (श्वि) हतं क्षिपेत् । विदश्चन्द्रहतं योज्यं सूरेरिन्द्रहतं धनम् ॥ १० ॥ धनं भृगोर्भ्रुवा निघ्नं रविघ्नं शोधयेच्छनेः । एवं मान्दाः परिध्यंशाः स्फुटाः स्युर्वक्ष्मि शीघ्रकान् ॥११॥ भौमस्याभ्रगुणाश्चीणि बुधस्याब्धिगुणेन्दवः । बाणाक्षा देवपूज्यस्य भार्गवस्येन्दुषड्यमाः ॥१२॥ शनेः चन्द्राब्धयः शीघ्रा ओजान्ते बीजवर्जिताः । द्विघ्नं खं कुजभागेषु बीजं द्विघ्नमृणं विदः ॥१३॥ अत्यष्टिघ्नं धनं सूरेरिन्दुघ्नं शोधयेत्कवेः । चन्द्रघ्नमृणमार्कस्य स्युरेभिर्दृक्समा ग्रहाः ॥ १४ ॥" इत्यागमोक्तानुसारेणेत्यर्थः ॥ तदपर्याप्तमित्याह तावतेति । दृक्करणैक्याय स्पष्टीकरणायेत्यर्थः ॥ यथा दृक्तुल्यतां ग्रहाः प्रयान्ति तत् स्फुटीकरणमिति तल्लक्षणात् ॥ नन्विदमसंभावितमेव । पारमार्थिकग्रहसंचारस्य "भूमेर्मध्ये खलु भवलयस्यापि मध्यम्" इति पूर्वोक्तं भवलयमध्यदृश्यत्वे भूपृष्ठगानां तद्वेधनासंभवात् । उच्यते । सत्यं भवलयमध्यस्थदृश्यमेव तत् ।

तथापि प्रथमं कल्पादौ ब्रह्मणा त्रिभोनलग्नसंपातोच्चसूत्रश्रोतमणिगणवत् ग्रहाणां स्थापितत्वेन तेषामुच्चसूत्रादेव प्रवृत्तत्वात् परीक्षादशायामपि तत्रैव निर्लम्बतया वेधनसौकर्याच्च तत्कालदृश्यो भवलयमध्यदृग्रूपत्वान्न दोष इति ध्येयम् । दृक्करणैक्याभावे को दोष इत्यत्राह खेटा स्थूला न कर्मणामर्हा इति । खेटानां कर्माहत्वं कर्माङ्गकालावच्छेदकक्रियावत्तया बोध्यम् ॥ "मध्ये चान्द्रमसे मासि नास्ति मध्यार्कसंक्रमः । यत्रासावधिकः पापी शुभकर्मविनाशनः ॥ यन्मासान्ते संक्रमः स्यान्मध्यार्कस्य स चाधिकः" इत्यादिब्रह्मसिद्धान्तवचनैः मध्यग्रहैरप्यधिमासादि साधनस्योक्तत्वात् तेषां कथं कर्मानर्हत्वमिति चेत् सत्यम् । तन्न कर्मानुष्ठानार्थमुक्तम् । मध्यग्रहानयनवत् स्फुटाधिमासाद्यानयनार्थमेव । अत एव मध्याधिमासम् अधिमास इति यः कोऽपि न व्यवहरति । मध्यग्रहानीतितिथ्यादिषु शुभाशुभकर्माणि न कुर्यात् । यदि कुर्यात्तर्हि मध्यग्रहणेऽपि (?) तदाप्येत । न चैवं लम्बनावनत्यादिदृक्कर्मसंस्कृतैरेव ग्रहैः तिथ्याद्यानयनप्रसंगः त्रिभोनलग्नसूत्रस्थग्रहाणां लम्बनाभावात् अवनत्यादेः प्राक्पश्चिमान्तरहेतुत्वाभावाच्च । भूगर्भस्थ भवलयमध्यापेक्षया हि स्फुटक्रिया स्फुटवासनायामुक्ता । शिष्टं स्पष्टम् ॥ ३ ॥

पाता रवेस्तामसकीलकाख्यास्तेषां
समाकर्षणतः शशाङ्कः ।
तच्छक्तिश्च निजस्वभावं
विहाय नित्यं विषमत्वमेति ॥ ॥४॥

चन्द्राच्च तद्योगवियोगतश्च साध्यं हि
भाद्यं विषमं यतः स्यात् ।
तस्माद्विधोरत्र विशुद्धिशुद्ध्यै
विस्तार्यते बीजफलक्रियेयम् ॥५॥

इदानीं चन्द्रमात्रस्य विस्तरतो बीजसंस्कारकथनहेतुमाह पाता रवेरिति । कर्माहकालसाधने चन्द्रस्यैव विशेषोपयोगात् तस्यैव वैषम्यातिरेकाच्च तद्बीजकर्मैवात्र प्रपञ्च्यत इति स्पष्टम् ॥

एकेन पुंसा निखिलग्रहाणामन्तं
प्रवेधो न हि शक्यतेऽतः ।
व्यासात्समासाच्च यथोपलम्भं
प्रोक्तं मयेत्यादरणीयमेतत् ॥६॥

अथेदानीं ग्रहान्तराणामुपयोगातिशयाभावेऽपि प्रत्ययार्थं वा जातकादिफलज्ञानार्थं वा बीजकर्म कुतो न विस्तारितमित्याह ॥ एकेन पुंसेति ॥ निगदव्याख्यातं स्पष्टमेव । अशक्त्युपपत्तिर्भगणवासनायां स्पष्टा ॥

रसगुणाभ्रमहीशकवत्सरे मम
हि जन्म बभूव महीतले ।
नगगुणोन्मितवत्सरपूरणे यदुत
बीजफलं तु मयोन्मितम् ॥७॥

अथेदानीमनन्तरकालीनानां बीजफलोपचयापचय ज्ञानार्थं स्वीयबीजोपनयकालमाह ॥ रसगुणेति ॥ स्पष्टा ॥

लिप्ता विधोरर्कमहीमिता मे
दृग्गोचराः प्रत्यहमीक्षितस्य ।
कदम्बगोलागतसूत्रपाते क्रान्तौ
धनर्णत्वजुषो भमध्यात् ॥८॥

अथेदानीं चन्द्रस्फुटे स्वोपलब्धं परमवैषम्यमाह ॥ लिप्ता विधोरिति ॥ अर्कमहीमिता लिप्ताः द्वादशाधिकशतलिप्ताः द्विपञ्चाशत्कलाधिक एको भाग इत्यर्थः । समसूत्रध्रुवसूत्रयोः व्यावर्तनायाह कदम्बेति । धनर्णत्वजुष इति कदाचिदेतावत्यो धनकलाः कदाचिच्च ता एव ऋणकलाश्च दृष्टा इत्यर्थः । कथमिदं दर्शनम् एवं क्रान्तिवलये स्फुटाधिकारोक्तमन्दफलसंस्कारेण तात्कालिकीकृत्य स्फुटीकृतस्य विधोः करणागतं यत् स्थानं तत्स्थानात् पश्चिमदिशि पूर्वोक्त ऋणकलान्तरिते स्थाने ऋणबीजफलस्य परमोपचयावस्थायां चन्द्रो दृश्यः । धनबीजफलपरमोपचयावस्थायां तु क्रान्तिवलये करणागतस्थानात् तावत्कलान्तरित प्राग्देशपतितकदम्बसूत्रे चन्द्रो दृश्य इत्यर्थः । तत्रैव भमध्यस्य स्थितत्वात् । एतेन उच्चसूत्र एव वेधनं कृतमिति ज्ञापितम् ॥

वैषम्यं करणदृशोस्तदेतदन्ये
शीघ्रोच्चात्तुहिनकरस्य वर्णयन्ति ।
तत्तावद्भवति हि मुग्धजल्पितं यत्-
सूर्याद्यै रविशशिनोर्निषिद्धमेतत् ॥९॥

अथेदानीमस्य वैषम्यस्य चन्द्रशीघ्रोच्चप्रयुक्तताम्ररीकृतवतो मल्लभट्टस्य मतमुपक्षिपति ॥ वैषम्यं करणेति ॥ "मान्दं कर्मैक-

मर्केन्द्वोः" इति स्फुटो ध्यायं भगवता सूर्यांशपुरुषेणैव सूर्यचन्द्रयोः शीघ्रकर्मादिनिषेधात् मुग्धजल्पितमिति । शिष्टं स्पष्टम् ।

मन्दोच्चनीचयोर्यद्वत्
बिम्बव्यासाल्पताधिकम् ।
उपलभ्येत शीघ्रस्य
सद्भावे तन्न दृश्यते ॥१०॥

अथ तन्मतस्योपपत्तिविरोधमप्याह मन्दोच्चेति । स्पष्टम् ॥ अयमत्र बिम्बव्यासवेधनक्रमः । अतिदीर्घान्तां मृण्मयीं यष्टिकां कृत्वा तदन्तः नलिकां कांचित् निवेशयेत् । तच्च दीर्घीकरणार्थं स्यात् । तां च नलिकां स्थूलाच्छमध्यरन्ध्रप्रोतां कृत्वा ध्याधार-यष्टिस्थितां स्थापयेत् । तन्नलिकाया एकपार्श्वे दृष्टिं विधाय अन्तः सुपिरेण ग्रहं पश्येत् । यदि नलिकापररन्ध्रव्यासात् ग्रहबिम्ब-व्यासाधिक्यम्, तदा क्षुद्रनलिकामन्तर्निखाय लघूकृत्य साम्य-मापादयेत् । यदि च रन्ध्रव्यासाधिक्यम्, तर्हि क्षुद्रनलिकां बहिरुद्धाट्य दीर्घीकुर्यात् यथा साम्यं भवति एवं प्रथमदिने साम्यं वेधयित्वा द्वितीयदिने तस्मिन्नेव काले वेधयेत् । तदा च वृद्धिह्रासौ स्पष्टमीक्ष्येत । तत्कालाद्यानयनादिकं पूर्वमेवोक्तम् । एवं परीक्षायां विधोः मन्दोच्चनीचस्थानव्यतिरिक्तस्थलेषु बिम्ब-ह्रासवृद्धि(पार?)सम्यानुपलम्भात् तस्य शीघ्रोच्चाभावः सिध्यतीति मल्लभट्टमतमनुपपन्नमेव ॥

शीघ्रोच्चनीचौ भवति हि येषां
तेषां तु वक्रा गतिरीक्ष्यते हि ।
नैषोपलब्धा शशिनः कदाचित्
केनास्य शीघ्रं सुधियाभ्युपेयम् ॥११॥

अथान्यदाह शीघ्रोच्चेति । स्पष्टम् ॥

प्रागुदयोऽपि च पश्चादस्तगतिश्चापि
भानुवच्छशिनः ।
नैव कुजादिवदिष्टा दृष्टा वा
तत् कुतो हि शीघ्रोच्चम् ॥१२॥

मन्दमात्रस्फुटो भानुशुद्धस्फुटः
कालभेदाद्यथा बीजतो भिद्यते ।
तद्वदेवैष पीयूषभानुस्फुटो भिद्यते
बीजतो नान्यथा वीक्ष्यताम् ॥१३॥

अथेदानीं कुत इदं फलवैषम्यं ज्ञातमित्यपेक्षायामाह मन्दमात्रेति । स्पष्टम् ॥

तयोर्यथा बीजमुशन्ति लोके
फलस्य जन्यं जनकं च तद्वत् ।
अत्रापि दैवज्ञगणा गुणेन
सादृश्यतो बीजमुशन्ति बीजम् ॥१४॥

यत्कारणं बीजमिदं स्थिरं
स्यात्तच्छास्त्रगम्यं समयेषु योज्यम् ।
यत्कार्यबीजं चरमे तदाहु
स्तत्संस्क्रिया सा सुधियावगम्या ॥१५॥

अथेदानीं बीजकर्म द्वेधा विभज्य तल्लक्षणमाह तयोर्यथा बीजमिति । बीजसादृश्यादत्र बीजव्यवहारः । तच्च द्विविधम् ।

स्थिरं चरं चेति। सामान्यतो विशेषतश्च शास्त्रैकसाध्यत्वं स्थिरलक्षणम्। सामान्यतः शास्त्रावगतत्वे सति विशेषतो दृक्साध्यत्वं चरलक्षणमिति विवेकः। शिष्टं स्पष्टम्। सामान्यलक्षणं तु कालविशेषानियतदृक्कर्मवैषम्यापादकत्वं बोध्यम् ॥

बीजं हि नैजाङ्कुरशक्तियुक्तं
स्वशक्तिमात्रेण यथा कुसूले।
तथा स्थिरं तिष्ठति निर्विकारं
कदाचिदेति प्रपुलं विकारम् ॥१६॥

अथेदानीं स्थिरस्यापि बीजत्वे विरोधाभावमाह बीजं हीति। स्थिरं बीजं कालविशेषे मन्दफलादिहेतुभूतं सत् वैषम्यापादकं स्वतोऽपि भवति। कालविशेषेषु च कुसूलस्थबीजवत् निर्विकारतयैव स्थितत्वात् फलान्तरार्थमपि न भवति। स्वतोऽपि वैषम्यं नापादयति। किं तु शास्त्रैकवेद्यतया शक्तिरूपेणैवावतिष्ठते। तस्मात् स्थिरत्वबीजत्वयोः न विरोध इति भावः। अत्र उपलब्धिरेव वासना ॥

यदा चरं बीजमुपैति योगं
तदा स्थिरं तत्प्रतिबन्धशक्ति।
यदा स्थिरं योगमुपैति बीजं
तदा चरं नाशयतीति मन्ये ॥१७॥

अथेदानीं तं कालविशेषं स्वोपलब्धेन केनचिदवच्छेदकेन निरूपयन्नाह यदा चरमिति। यदा स्थिरं बीजं स्वकार्यतो दृग्योगमुपयाति तेन चरबीजं स्वरूपत एव नाश्यते। अतोऽस्य

चरत्वं कालविशेषाभावत्वं च । यदा चरबीजमुत्पन्नं स्वकार्यतो दृग्योगं भजते, तदा स्थिरं बीजं तेनैव प्रतिबद्धशक्तिकं स्वरूपमात्रेणावतिष्ठते । न कार्यकरं भवति । अतोऽस्य स्थिरबीजत्वम् । एतदुक्तं भवति । आगमेषु स्थिरबीजमात्रस्य विशिष्याम्नानात् कृतयुगान्ते स्थिरबीजमेवोपलब्धमिति निश्चीयते । चरबीजस्य तु तदा रविचन्द्राभ्यां विस्रंसनं भविष्यतीति भविष्यत्त्वेनैवोक्तत्वाच्चरबीजं तदानीं नासीदिति च निर्णीतम् । अस्मत्परीक्षाकाले तु स्थिरबीजं नोपलभ्यते । तत्संस्कृतग्रहानीतग्रहणग्रहयुद्धादीनां दृग्विसंवादात् । भविष्यत्त्वेन सामान्येन यदुक्तं चरबीजं तदेवेदानीमुपलभ्यते । तत्संस्कृतग्रहानीतग्रहणादीनामेव दृक्तुल्यत्वात् । अतोऽनयोः परस्परविरोधावगमात् अनयोरेकाभावकाले अपरस्य प्रवृत्तिरिति निश्चीयत इति । अत्र मन्ये इत्यनेन स्वनिर्णयस्याविश्वसनीयता सूचिता । ततश्चानन्तरकालिकैरिदं परीक्ष्यैव विश्वसनीयमिति दर्शितम् । यतोऽस्मिन् शास्त्रे तत्रापि बीजकर्मण्युपलब्धिरेव प्रमाणम् । तत एतत् परीक्ष्यैव ग्राह्यमिति भावः ॥

स्थिरं तु बीजं फलहेतुभावान्मध्याधिकारे हि पुरा मयोक्तम् ।
चरस्य बीजस्य फलोत्थितत्वाच्छिष्टं तदेवेह निरूपणीयम् ॥१८॥
बीजं चरं यद्रविचन्द्रमान्दस्फुटक्रियापेक्षमिहेष्यमाणम् ।

मध्याधिकारे न हि तत् प्रवक्तुं
कर्तुं च शक्यं तदिहोच्यते तत् ॥१९॥

अथेदानीं चरबीजस्यैवात्र वक्तव्यत्वे हेतुमाह स्थिरन्त्विति। स्पष्टम् ॥

तुङ्गादाद्यपदान्तस्थात् विधोरर्के पदार्द्धतः।
परमं चन्द्रवैषम्यमृणत्वेन समीक्ष्यते ॥२०॥
तत्तृतीयपदान्तस्थात् पृष्ठगेऽर्के पदार्द्धतः।
परमं चन्द्रवैषम्यं धनत्वेन समीक्ष्यते ॥२१॥
चन्द्रतुङ्गे च नीचे च शशाङ्कार्कग्रहौ यदि।
मन्दस्फुटगतश्चन्द्रो निर्बीजस्तुल्यमीक्ष्यते ॥२२
ओजान्तयोर्विधोस्तुङ्गाच्छशाङ्कार्कग्रहौ यदि।
चतुस्त्रिंशत्कलाहीनं वैषम्यं तु समीक्ष्यते ॥२३॥
अग्रतः पृष्ठतो वापि रवेश्चन्द्रे पदार्द्धगे।
तुङ्गतुल्ये चतुस्त्रिंशत्कलावैषम्यमीक्ष्यते ॥२४॥
एवं तन्नीचतुल्येऽपि वैषम्यं तावदेव हि।
एवं व्यासात्समासाच्च पौनःपुन्येन वेधनात् ॥२५
चरबीजमिदं क्लृप्तं मया सद्भिः समीक्ष्यताम्।

अथेदानीं स्वाभिमत चरबीजसंस्कारावक्लृप्तिमूलभूतान् स्वोपलम्भप्रकारानाह। तुङ्गादाद्यपदान्तस्थादिति। अत्र हि चन्द्रचरबीजे क्रियाद्वयं वर्तते। एकक्रियायां परमफलमष्टसप्ततिकलाः।

अपरत्र च चतुस्त्रिंशत्कलाः । उन्नयोः केन्द्रवशाद्यत्र धनर्णसाम्येन मेलनं तत्र परमं फलं सद्वादशशतकलात्मकं भवति तत्रैव परमं भवति, तत्र व्यस्तयोस्तयोः पृथगुपलम्भः । तत्र प्रथमफलस्य प्रवृत्तिर्निवृत्तिश्च तुङ्गादेव मन्दफलसमानयोगक्षेमा । अनन्तरस्य तु स्फुटसूर्यस्थानादोजे धनं युग्मे ऋणमिति प्रवृत्तिनिवृत्ती उपलभ्येते । अयमेव केषांचित् चन्द्रस्यापि शीघ्रोच्चमस्तीति भ्रमहेतुः । तदिदं सर्वं स्वोपलब्ध्यैव निर्णीतमिति तदुपलम्भप्रकारदर्शनं स्पष्टमेव ॥

रसा ६ गुणेन्दू १३ शशिलोचनौ च २१
भूभृत्करौ २७ कालगुणौ ३३ नवाग्निः ३९ ॥२६॥
शराब्धयः ४५ चन्द्रशरा ५१ रसार्थाः ५६
पृथ्वीरसाः ६१ बाणरसा ६५ गजाङ्गाः ६८ ।
शून्याद्रयो ७० बाहुगिरी च ७२ वेदतुरंगमा ७४
बाणहया ७५ शराङ्गाः ६५ ॥ २७ ॥
रसाद्रयः ७६ चाङ्गहया ७६ हयाश्वा ७७
हयाद्रयो ७७ नागहया ७८ गजाश्वाः ७८ ।
गजाद्रय ७८ श्चेति फलं ऋणे ऋणं
धने धनं मन्दफलेन संयुतम् ॥ २८ ॥

अथेदानीं चतुर्विंशतिज्यार्द्धानां क्रमाच्चरबीजफलपिण्डानाह रसा इति ॥ एतानि ज्याफलानि मन्दज्याफलेषु संयोज्य यथाक्रमं धनर्णभावेन मध्ये संस्कारः कर्तव्य इत्यर्थः ॥

अर्कस्फुटाच्चन्द्रमिमं विशोध्य
शिष्टे ऋणं त्वोजपदे फलं स्यात्।
अतोऽन्यथान्यत्र यथाक्रमं वै
ब्रुवे फलानामपि पिण्डकानि ॥२९॥
रसाश्च ६ नन्दा ९ गुणतारकेशौ १३
भूभृद्भुवौ १७ बाहुकरौ २२ जिनाश्च २४।
ताराः २७ खरामा ३० द्विगुणाश्च ३२ देवा ३३
वाराशिरामाः ३४ सरिदीशकालाः ३४ ॥३०॥
वेदाग्नयो ३४ दानवशत्रवश्च ३३
शशाङ्कवह्नी ३१ नवबाहवश्च २९।
रसाश्विनौ २६ वेदकरौ २४ खबाहू २०
रसक्षमे १६ रुद्र ११ गजाऽनलाः ३ खम्० ॥३१
एताः कला ओजपदे ऋणं
स्युर्धनं तदन्यत्र भवन्ति भूयः।
अनेन युक्तश्च शशिस्फुटः स्यात्
कर्मार्हकालानयनेषु योग्यः ॥ ३२ ॥

अथ द्वितीयमाह अर्कस्फुटाच्चन्द्रमिति ॥ निगदव्याख्या तमेतत् स्पष्टमेव ॥

यतश्चरं बीजमिदं विशेषात्
दृष्ट्वैकगम्यं करणैरसाध्यम्।

ततो यथादर्शनमेव पिण्डा-
न्युक्तानि तान्यन्यगतिं विहाय ॥३३॥

अथेदानीं निरुक्तप्रकारेण करणादिकमन्तरा बीजफलपिण्डानामेव कथने को हेतुरित्याकाङ्क्षायामाह यतश्चरमिति । स्पष्टम् ॥

तिथिद्वयं यद्यपराह्णसक्तं
स्थूलैर्विवेक्तुं न हि शक्यतेऽतः ।
नेयं तदेतत् चरबीजसिद्धा-
त्सूक्ष्माद्विधोर्दोषकृदन्यथा स्यात् ॥३४॥

अथेदानीं स्पष्टीकृतस्य चन्द्रस्य प्रयोजनमाह तिथिद्वयमिति । स्पष्टम् ॥

यात्राविवाहोत्सवजातकादौ
खेटैः स्फुटैरेव फलस्फुटत्वम् ।
स्यात्प्रोच्यते तेन नभश्चराणां
स्फुटक्रिया दृग्गणितैक्यकृद्या ॥३५॥

अथेदानीं स्फुटाधिकारोक्त स्पष्टीकरणस्य चरबीजसंस्कारपर्यन्ततां ज्ञापयितुं तदधिकारोपक्रमोक्तश्लोकेनेमं प्रकरणं संगमयन्नाह यात्रेति । प्रोच्यते सर्वैः शास्त्रैरिति प्राकरणिकोऽर्थः । या दृग्गणितैक्यकृत् सा स्फुटक्रियेति योजना । एतेन स्पष्टाधिकारोक्त स्फुटक्रिया न तत्र परिसमाप्ता किन्त्वत्रैव परिसमाप्तेति-ज्ञापितम् ॥

पर्वावसानं हि कदम्बसूत्रस्थित्यर्द्ध-
नाडी शशभृद्ग्रहे स्यात् ।
अबीजसंस्कारतिथेः समाप्तौ
सा वै न दृष्टा न ततस्तदिष्टम् ॥३६॥

अथेदानीं केवलं हव्यकव्यादिकालानयनमात्रोपयुक्तं बीजसंस्करणं ग्रहणग्रहयुद्धसमागमादीनामपि इदमावश्यकमित्याह पर्वावसानमिति । यतः अबीजसंस्कृत चन्द्रानीतपर्वान्ते कदम्बसूत्रस्थित्यर्द्धस्य अनुपलम्भः तत एव हेतोः स्थूलग्रहेण तिथ्याद्यानयनस्य दुष्टत्वावगमात् तन्नेष्टमित्यर्थः ॥

सूर्यग्रहे चन्द्रसमागमादौ
तत्कालतिथ्यंशविशेषसाध्यम् ।
यल्लम्बनं तेन च सूक्ष्मखेटैस्तिथ्या-
दिकं नित्यमिह प्रसाध्यम् ॥ ३७ ॥

अथेदानीं सूर्यग्रहणादीनामपि स्फुटतिथिसापेक्षत्वात् सूक्ष्मग्रहेणैव तिथ्याद्यानयनमावश्यकमित्याह सूर्यग्रह इति । स्पष्टम् ॥

यदि च लम्बनसंस्कृतखेटत-
स्तिथिमुखानयनं परिचोद्यते ।
बधिर तर्हि तव श्रुतिगोचरं
वितथमेव हि लम्बनशासनम् ॥३८॥

अथेदानीं लम्बनादि संस्कृतग्रहस्यैव अतिसूक्ष्मत्वात् तेनैव तिथ्यादिकं साधनीयमिति शङ्कामुपहसन्नाह यदि चेति । तिथ्यन्ते लम्बनविधानं व्यर्थमेवेत्यर्थः ॥

येषां हि भूमौ युगपत्प्रवृत्तिस्तेषां
तु नेष्टं नतिलम्बनाद्यम् ।
ये संदिहन्त्यत्र शशिग्रहं ते
विलोक्य विस्रब्धहृदो भवेयुः ॥३९॥

लम्बनादिकं विनैवानीतस्य चन्द्रोपरागस्य तन्मध्यकाल-विशेषावसानस्य शुद्धपर्वान्तस्य च युगपत्प्रवर्तमानस्य प्रत्यक्ष-सिद्धत्वात् सलम्बनं तदानयने नितरां दृग्वैषम्याच्च तद्दृष्टान्तेन युगपत्प्रवर्तमानानां नक्षत्रयोगकरणानां सर्वेषां लम्बनादिकरणं दोष इति सिध्यत्येवेति स्पष्टम् ॥

तिथ्यादिकानां युगपत्प्रवृत्ति-
नैवोपगम्येति यदि ब्रवीषि ।
तदा तु देशान्तरसंस्क्रियैषां
मुधैव भूयात् गणकोपनीता ॥४०॥
यन्मेरुलङ्कापुरमध्यसूत्रं ततः
स्वदेशान्तर निर्णयोऽपि ।
विधुग्रहे नो यदि यौगपद्यं
महात्मभिस्तेन कथं कृतः स्यात् ॥४१॥

अथेदानीं तिथ्यादीनां युगपत्प्रवृत्त्यनभ्युपगमे दोषमाह तिथ्यादिकानामिति । स्पष्टम् ॥

भूमध्यदेशात् गणितं तु येषां
तेषां हि भूमौ युगपत्प्रवृत्तिः ।

भूमध्यदेशान्न हि लम्बनं स्या-
द्यल्लम्बनं पृष्ठतले प्रयोज्यम् ॥ ४२ ॥

अथेदानीं युगपत्प्रवृत्तिरस्तु। लम्बनादिनैरपेक्ष्यं मास्त्विति शङ्कायामाह भूमध्येति ॥

यतः कर्द्धोच्छ्रितो द्रष्टा चन्द्रं पश्यति लम्बितम्।
साध्यते कुदलेनातो लम्बनं च नतिस्तथा ॥४३॥

लम्बनावनत्योः पृष्ठप्रयोज्यतामुपपादयति यत इति। इदं सर्वं गोले कथितमेव। तथापि मन्दजनानुजिघृक्षया पुनरत्राप्युच्यते। इदमत्र छेद्यकम् ॥

इष्टापवर्तितां पृथ्वीं कक्षे च शशिसूर्ययोः।
भित्तौ विलिख्य तन्मध्ये तिर्यग्रेखां तथोर्ध्वगाम् ॥
तिर्यग्रेखायुतौ कल्प्यं कक्षायां क्षितिजं तथा।
ऊर्ध्वरेखायुतौ खार्द्धं दृग्ज्याचापांशकैर्नतौ ॥४५॥
कृत्वार्केन्दू समुत्पत्तिं लम्बनस्य प्रदर्शयेत्।
एकं भूमध्यतः सूत्रं नयेच्चण्डांशुमण्डलम् ॥४६॥
अमान्तसूत्रं तद्विन्द्यात् तत्र सूर्येन्दुसंगमात्।
द्रष्टुर्भूपृष्ठगादन्यत् दृष्टिसूत्रं तदुच्यते ॥४७॥
कक्ष्यायां सूत्रयोर्मध्ये यास्ता लम्बनलिप्तिकाः।
गर्भसूत्रे सदा स्यातां गततिथ्यंशलिप्तिके ॥४८॥
स्याताममान्तसूत्रेऽतश्चन्द्रार्कौ समलिप्तिकौ।

द्रष्टुः कर्धान्तरस्यास्य गर्भात् खार्धनते रवौ ॥४६॥
दृक्सूत्राल्लम्बितश्चन्द्रस्तेन तल्लम्बनं स्मृतम् ।
दृग्गर्भसूत्रयोरैक्यात् खमध्ये नास्ति लम्बनम् ॥५०
स्थितिस्तत्रैव खेटानां दृश्यते पारमार्थिकी ।

इदं सर्वं प्रायशो गोलाध्याये स्वरूपमात्रं व्याख्यातम् । अत्रापि वैशद्याय किञ्चिदुच्यते । भूगर्भात् भूव्यासार्धपरिमितोच्छ्रायवति भूपृष्ठे स्थितो द्रष्टा स्वकक्ष्यायां परमार्थतः स्वस्थानस्थितमपि ग्रहं द्रष्टुर्देशभेददोषात् स्वस्थानान्नतमिव दृङ्मण्डले पश्यति । अतः तद्ज्ञानार्थं पृथिवीव्यासर्धयोजनानि तत्तद्ग्रहकक्ष्याव्यासार्धयोजनानि च यथालाघवमेकेनैव हरेण हृत्वा तत्फलप्रमाणव्यासार्धकं भूमण्डलं कक्ष्यामण्डलानि भमण्डलं च वृत्तं यथाक्रमं विलिखेत् । तत् कथम् । श्लक्ष्णायां पूर्वापरायतायां भित्तौ उत्तरपार्श्वे बिन्दुं कृत्वा तस्मात् बिन्दोः पूर्वोक्तेन भूव्यासार्धच्छेदफलमिताङ्गुलव्यासार्धेन भूपरिधिं विलिखेत् । तदेव वृत्तं पृष्ठरेखां जानीयात् । अथ यन्मध्ये बिन्दुः तमेव गर्भं जानीयात् । अथ भूगर्भबिन्दुमेव नाभिं कृत्वा तत्तत्कक्ष्याव्यासार्धैः ग्रहकक्ष्यामण्डलानि भमण्डलं च वृत्तं विलिखेत् । तस्मादेव भूगर्भात् मकरस्य मुखान्युत्पाद्य ऊर्ध्वरेखा तिर्यग्रेखा च कार्या । तिर्यग्रेखा यत्र कक्ष्यायां पूर्वापरदिशोर्लगति तत्र क्षितिजं कल्प्यम् । एवमूर्ध्वरेखा यत्र भकक्ष्यायां लगति तत्र खमध्यं कल्प्यम् । एवं चन्द्रकक्ष्यायां रविकक्ष्यादिषु च प्रत्येकं खमध्यं कल्प्यम् ॥ ताश्च कक्ष्याः भगणांशलिप्ताविलिप्तिभिः यथायोग्यमङ्कनीयाः । तत्र भकक्ष्यायां किंचित् स्थानं भगणादि-

त्वेन परिकल्प्य, तत्र रेवतीयोगतारांचिह्नं दद्यात् । ततश्च भधु-वोक्तप्रकारेण अश्विन्यादि योगतारांश्च यथास्थानमङ्कयेत् । अथ या ग्रहकक्ष्याः ता एव ग्रहाणां दृङ्मण्डलानि । अथ इष्टकाले अर्कस्य वा अन्यस्य वा ग्रहस्य या दृग्ज्या तच्चापांशैः खमध्यान्नतो विन्दुः तत्कक्ष्यायां कार्यः । एवं चन्द्रकक्ष्यायामपि तावद्भिरेव नतां शैः कार्यः । ते विन्दव एव ग्रहा मन्तव्याः । अथ भूमध्यात् भमण्डलपर्यन्ता तत्तद्ग्रहमध्यगामिनी रेखा कार्या । सा रेखा दर्शान्ते दर्शान्ते चन्द्रसूर्यमध्यं भित्त्वा तत्कालं भमण्डले यस्मिन्न क्षत्रे यावद्भागलिप्ताविलिप्तासु सूर्यचन्द्रौ तिष्ठतस्तत्रैव गच्छेत् । शुक्लप्रतिपदन्ते सूर्यात्पुरतः द्वादशभागान्ते तत्कक्ष्यां भित्त्वा भमण्डले यावदंशे तात्कालिकश्चन्द्रस्तिष्ठति तत्रैव भूगर्भात् चन्द्र-नाभिकं सूत्रं पतेत् । एवं शुक्लद्वितीयान्ते चतुर्विंशतिभागान्ते । एवमन्यदपि तिथिभोगमानेनैव ज्ञातव्यम् । एवं चन्द्रेण सह अन्यग्रहग्रासकालेऽपि भूगर्भादेव तत्तद्ग्रहगामिनीः रेखाः कुर्यात् । ताश्च रेखाः चन्द्रं ग्रहं च भित्त्वा तत्काले तौ परमार्थतः भमण्डले यस्मिन्नक्षत्रे यावदंशलिप्तासु तिष्ठतस्तत्रैव पतेयुः । अथ भूपृष्ठगात् द्रष्टुरन्या रेखा रविविन्दुं तत्तद्ग्रहविन्दून् वा नेया । सा रेखा चन्द्रे न लगति । दूरककक्ष्यात्वात् द्रष्टुः कुदलोच्छ्रितत्वाच्च । अथ तयोः भूपृष्ठतद्गर्भसूत्रयोरन्तरे चन्द्रकक्ष्यायां यावदंशलिप्ताविलि-प्तादिकं ता एव लम्बनलिप्तादिकं ज्ञेयम् । इदं तु लम्बनं ग्रहणा-मुच्चकाले चन्द्ररय नीचस्थितौ परमोपचितं भवति । विपर्यये परमापचयः । उपचयापचयौ क्षितिज एव परीक्षणीयौ । एवमेव गततिथ्यंशानां भांशानां च लम्बितचन्द्रान्तरं दर्शनीयम् । तद्यथा। भूगर्भात् सूर्यकक्ष्यायां सूर्यविन्दोः गततिथ्यंशान्तगामिनी

रेखा कार्या । सा रेखा चन्द्रनाभिं गततिथ्यंशान्तं च भित्त्वा भमण्डलं गच्छेत् । अथ भूपृष्ठात् गततिथ्यंशान्तगामिनीं रेखां कुर्यात् । सा खार्धान्नते चन्द्रे न लगति । खार्धस्थे तु चन्द्रे तन्मध्यगामिन्या भूपृष्ठरेखाया भूगर्भरेखायाश्च अन्तराभावात् लम्बनं नास्त्येव । एवमेव गतभांशेष्वपि द्रष्टव्यम् । अत्र यत्तावत् भूपृष्ठात् खार्धान्नतं ग्रहं गच्छति तत्सूत्रं दृक्सूत्रमुच्यते । तत्तु द्रष्टुः प्रत्ययकमेव । यत्तावत् भूगर्भात् ग्रहं गच्छति तदेव पारमार्थिकग्रहस्थानवेधि । तत्र च हेतुः । 'भूमेर्मध्ये खलु भवलयस्यापि मध्यमिति' पूर्वोक्तमेव । अथ यत्तावत् भूपृष्ठात् खमध्यस्थान् ग्रहान् गच्छति तस्य सूत्रस्य भूपृष्ठसूत्रत्वेऽपि तत्र कुदलोच्छ्रायायत्तान्तरस्य हान्या तस्यैव भूगर्भसूत्रत्वापत्तेः प्रत्यक्षत्वात्तदपि पारमार्थिक ग्रहवेधकमेव । अतस्तेनैव स्पष्टा ग्रहाः तिथ्याद्यंशाश्च वेधनीयाः । तदेवं लम्बनस्य भूपृष्ठप्रयोज्यत्वेन भूमध्यदृक्तुल्यत्वेनानीतस्पष्टग्रहसाध्यानामत एव युगपत्प्रवर्तमानानां तिथ्यादीनां न लम्बनसंस्कारप्रसक्तिः ॥

भूपृष्ठ सर्वदेशानां
मध्यमेव यतः समम् ।
तत्तुल्यखेचरानीतं
तिथ्याद्येव वरं ततः ॥ ५१॥

अथेदानीं भूमध्यदृक्तुल्यस्फुटानीतानां तिथ्यादीनामेव सार्वत्रिकानुष्ठानार्हत्वे हेतुमाह भूपृष्ठेति । वरं सर्वदेशावच्छेदेनाप्यनुष्ठातुं योग्यमित्यर्थः ॥

ग्रस्तास्तसूर्यग्रहणे शुक्लपक्षे तु पैतृकम् ।
विशेषवचनैरेव नतु पर्वान्तसत्तया ॥५२॥

अथेदानीं ग्रस्तास्तगाम्यर्कग्रहे पैतृकार्हकृष्णपक्षस्य लम्बनसंस्कृत ग्रहानीतस्यैव ग्रहणदर्शनात् लम्बनसंस्कृता तिथिरपि ग्राह्यैवेत्याशङ्कायामाह ग्रस्तास्त इति ॥ विशेषवचनैः 'ग्रस्यमाने दिवाकरे' इत्यादिभिः ग्रासदर्शनकालस्यैव तत्कर्माङ्गतां विदधद्भिः विशेषशास्त्रैरेवेत्यर्थः । पर्वान्तसत्तया न । लम्बनसंस्कृतग्रहानीतपर्वान्तसत्ताप्रयुक्तं नेत्यर्थः ॥

अवनत्यादिभिर्यस्मान्न
भिद्यन्ते स्फुटग्रहाः ।
पूर्वापरान्तराभावा
त्तन्नेष्टा इह तत्क्रियाः ॥५३॥

अथेदानीं तिथ्यादिषु मास्तु लम्बनम् । अवनत्यादि संस्काराः कार्या एवेत्यत्राह अवनत्यादिभिरिति ॥ अवनत्यादीनां दक्षिणोत्तरान्तरमात्रहेतुतया कदम्बसूत्रदृश्यानां स्फुटानामभेदकत्वात् अवनतिकर्माक्षकर्मायनकर्मादिकं शुद्धग्रहस्फुटसाध्येषु तिथ्यादिषु प्रयोजनाभावान्न कार्यमित्यर्थः ॥

भनेमिके द्वादशराशिभक्ते
कक्षान्वितारे क्षितिगर्भनाभौ ।
चक्रे ग्रहा विश्वसृजा निविष्टा
उपर्युपर्यश्विकमध्यसूत्रे ॥ ५४ ॥

निविष्टाः निवेशिता इत्यर्थे ।

ततो ध्रुवेण प्रवहाख्यपा शै-
रुचैश्च पातैश्च विकृष्यमाणाः ।

तथा तथा यान्ति गतीर्विभिन्नाः
कल्पावसाने (षु) सुसमाभवेयुः ॥५५॥
अतः कुमध्याद्गतखार्धसूत्रे
दृक्तुल्यतामेति नभश्चरो यः ।
स एव शुद्धः परमार्थतः स्या
.....स्फुटस्ततो ऽन्यः ॥ ५६ ॥

अथेदानीं खमध्ये दृश्यमानस्य भूमध्यदृक्तुल्यग्रहस्यैव पारमार्थिकत्वे हेतुमाह भनेमिक इति। ग्रहा हि नाम अन्योन्यं बहुयोजनान्तरितासु स्वस्वकक्ष्यासु ऊर्ध्वाधोभावेन परस्परावर्तानभिज्ञमेव भ्रमन्ति । तेषामुपरि दूरे भगणः । अतो ग्रहाणां भगणोपरि साक्षात् स्थितिर्न संभवति । किं तु भगणाश्रितनेमिकत्वात् भगणनामकं चक्रं निर्माय तस्य नाभिं भूगर्भे संयोज्य तदुदरमध्ये परितः ग्रहकक्ष्या यथाक्रमं स्थापयित्वा शकटचक्रवत् स्थापितं तन्नेम्याश्रितं भमण्डलं द्वादशधा विभज्य प्रतिभागमंशलिप्ताविलिप्तादिकं च विभज्य भूमध्यस्थितनाभिदेशात् प्रतिविलिप्तं सूत्राणि नीत्वा बद्धानि । तेषु यदश्विनीमुखे रेवतीनक्षत्रे बद्धं सूत्रं तस्मिन्नेवोपर्युपरि प्रोता मणिवरा इव चन्द्रादयो ग्रहा सृष्ट्यादौ ब्रह्मणा निवेशिताः । एवं समस्तग्रहभमण्डलाश्रितं भचक्रं प्रत्यङ्मुखं विधिनैव भ्रामितं भ्रमति । तत्र भचक्रारगते तत्तद्ग्रहकक्ष्यामण्डले भूगर्भस्थभचक्रनाभिदेशात् तन्नेम्याश्रित भगणराश्यंशलिप्ताविलिप्तागतानि सूत्राणि यत्र यत्र प्रतन्ति तानि तत्र तत्रैव तत्तद्भगणराश्यंशलिप्ताविलिप्ताकाष्ठेति तत्तत्स्थान-

स्थितिरेव तत्तद्ग्रहाणां भगणराश्यंशलिप्तागतिर्नाम । तस्मात् परमार्थतो ग्रहस्थितिरेवंविधत्वात् भूमध्यदृक्तुल्यानां खार्धस्थानपरीक्षितानामेव सकलकर्माङ्गकालानयनार्हत्वमित्युपपन्नम् ॥

ज्योतिर्गणे शास्त्रपथातिवृत्तौ
यद् ब्रह्महत्यां मुनयो वदन्ति ।
नित्यं ग्रहाणामहरर्धकाले
निर्णेयमेतन्तु परीक्ष्य दक्षैः ॥५७॥

इदं सर्वमवश्यं परीक्ष्य निर्धार्यमित्याह ज्योतिर्गण इति । "ज्यौतिषं व्यवहारं च प्रायश्चित्तं चिकित्सकम् । विना शास्त्रेण यो ब्रूयात् तमाहु र्ब्रह्मघातकम्"॥ इति मुनयो वदन्तीति शिष्टं स्पष्टम् । तदेवं बीजसंस्कृतग्रहस्य कर्मानुष्ठानार्हसूक्ष्मकालानयनमेव प्रयोजनमिति प्रतिपादितम् ॥

शिखा मयूरस्य मणिर्महाहे-
र्यथा तथेदं सकलागमानाम् ।
तस्मादसांवत्सरवासिनां वै
न देयमेतत् परमं रहस्यम् ॥५८॥

अथेदानीं बीजोपनयस्यातिरहस्यत्वात् गोप्यतमत्वमुक्त्वा निगमयति शिखामयूरस्येति । तदेतत् स्पष्टं सूर्योक्तमेव ॥ यथा बीजोपनयाध्यायादौ ।

"यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्ध्नि संस्थितम् ॥
न देयं तत् कृतघ्नाय वेदविक्रायकाय च ।
अर्थलुब्धाय मूर्खाय साहंकाराय पापिने ॥

एवंविधाय पुत्रायाप्यदेयं सहजाय च ।
दत्तेन वेदमार्गस्य समुच्छेदः कृतो भवेत् ॥
व्रजेतामन्धतामिस्रं गुरुशिष्यौ सुदारुणम् ।
ततः शान्ताय शुचये ब्राह्मणायैव दापयेत् ।" इति ॥

अन्ते च

"एतद् बीजं मयाख्यातं प्रीत्या परमया तव ।
गोपनीयमिदं नित्यं नोपदेश्यं यतस्ततः ॥
परीक्षिताय शिष्याय गुरुभक्ताय साधवे ।
देयं विप्राय नान्यस्मै प्रीतिकञ्चुकधारिणे ॥
बीजं निःशेषसिद्धान्तरहस्यं परमं स्फुटम् ।" इति ॥

कथितमकथितं वा यद्यदत्राज्ञभावा-
न्निजसहनदयार्द्रैः सज्जनैः क्षम्यतां तत् ।
शिरसि करतलाभ्यामञ्जलिं कल्पयित्वा
विनयभरविनम्रो याचयेऽहं प्रणम्य ॥५६॥

इति श्रीमहामहेश्वरोपाध्यायसुतभास्कराचार्यविरचिते वासनाभाष्य-
मिताक्षरे बीजोपनयाधिकारः समाप्तः ॥



दीक्षितीया तिथिनिर्णयकारिका

जगद्गुरुं नमस्कृत्य कमलागृहमेधिनम् ।
करोमि महतां प्रीत्यै श्राद्धार्हतिथिनिर्णयम् ॥ १ ॥
सौरेण वाथ चान्द्रेण मानेनैकेन केनचित् ।
पूर्वैराचरितेनैव व्रतश्राद्धादिकं चरेत् ॥ २ ॥
कुलाचारानुरोधेन देशधर्माननुव्रजेत् ।
कुलाचारपरित्यागी पङ्किलां गतिमश्नुते ॥ ३ ॥
यदा यत्राचरेत्कर्म तत्र तन्निकटेऽपि वा ।
गणितं यत्तु पञ्चाङ्गं तेन तत्तत्समाचरेत् ॥ ४ ॥
देशान्तरैस्तथाक्षांशैः भिन्नास्तिथ्यादिनाडिकाः ।
अतः स्यादेशभेदेन तिथ्यादीनां विभिन्नता ॥ ५ ॥
राहुदर्शनतोऽन्यत्र दृक्सिद्धा नेष्यते तिथिः ।
विशेषवचनेनैव सायंसन्ध्यारविग्रहे ॥ ६ ॥
शुक्लपक्षेऽपि दृक्सिद्धे पर्वान्ते पैतृकं मतम् ।
बीजोपनयभाष्ये च भास्करेण विपश्चिता ॥ ७ ॥
लम्बनाक्षादि दृक्कर्म तिथिभादौ निवारितम् ।
अतः स्वदेशदृक्सिद्धतिथौ श्राद्धं न चाचरेत् ॥ ८ ॥
भचक्रनाभिदृक्सिद्धे कुर्यात् श्राद्धव्रतादिकम् ।
भचक्रनाभिदृश्यस्य कर्माङ्गत्वे च हेतवः ॥ ९ ॥
बीजोपनयभाष्यान्ते भास्करार्यैः प्रपञ्चिताः ।
साधितैश्चरबीजान्तैः खार्धदृक्कर्मभिर्ग्रहैः ॥ १० ॥

तिथ्यादिकं समानीतं गृह्णीयात्पैतृकादिषु ।
द्रष्टुः स्वदेशदृक्तुल्याः प्रत्ययायैव केवलम् ॥ ११ ॥
निपुणैर्ग्रहणे नृणां साधिता लम्बनादिभिः ।
भचक्रनाभितुल्या हि ग्रहाणां पारमार्थिकी ॥ १२ ॥
स्थितिर्गतिश्च भवति न स्वदेशसमा नृणाम् ।
सर्वत्रात्र भवेन्मानं बीजोपनयवासना ॥ १३ ॥
तस्मात्केवलदृक्सिद्धेनैव श्राद्धादिकं चरेत् ।
यद्येवंभूतपञ्चाङ्गं समीपे नैव लभ्यते ॥ १४ ॥
तदा दूराद्भवं वापि गृह्णीयाच्छ्राद्धकर्मणि ।
सप्तयोजनमात्रस्य भादौ विघटिका दश ॥ १५ ॥
पञ्चाङ्गदेशात्पूर्वस्मिन्योज्याः शोध्यास्तु पश्चिमे ।
दक्षिणोत्तरसूत्रे तु दिनमानान्तरं द्वयोः ॥ १६ ॥
द्वेधा विभज्य तत्रैकं संस्कार्यं तिथिभादिषु ।
पञ्चाङ्गादुत्तरे योज्यं शोध्यं दक्षिणभागतः ॥ १७ ॥
यत्तु भानां तिथीनां च संध्यानाड्यादिकं स्मृतम् ।
तद्यात्रादिमुहूर्तार्थं न तु श्राद्धादिषु क्वचित् ॥ १८ ॥
एवमध्यर्द्धभोगादि नक्षत्रादि महर्षिभिः ।
यात्रादिफलसिध्यर्थं सुसूक्ष्मगणनैः कृतम् ॥ १९ ॥
सूक्ष्मतारादिके यस्मादतिवृद्धिरति क्षयः ।
ततस्तानि फलायैव न व्रतायेति निश्चितम् ॥ २० ॥
ग्रहाणां वक्रसमये पूर्वराशिफलं यथा ।
तथैवाध्यर्द्धभोगादि भादीनां फलमीरितम् ॥ २१ ॥
तस्मादध्यर्द्धभोगादिसंध्यांशादिप्रकल्पनम् ।
कर्मणोऽन्यत्र जानीयात् शुभकालविनिर्णये ॥ २२ ॥

रवीन्दुमन्दसंसिद्धात्तत्तत्तिथ्यादि भोगतः ।
स्यातां तत्कालबीजोत्थौ बाणवृद्धिरसक्षयौ ॥ २३ ॥
तत्कालबीजोपनयो भास्करेण विपश्चिता ।
बीजोपनयभाष्यादावन्यैरपि निवेदितः ॥ २४ ॥
अतः पैतृककर्मादौ तत्कालचरबीजकैः ।
बाणवृद्धा रसक्षीणा ग्राह्या नान्या तिथिः क्वचित् ॥ २५ ॥
एवं सायनवर्षाणां मासानामपि निर्णयः ।
व्यतीपातादिसिध्यर्थं प्रत्ययार्थमपीष्यते ॥ २६ ॥
मयाय सूर्यसिद्धान्ते भास्करांशः पुमानपि ।
दृक्कर्मायनमोक्षं च ग्रहाणां निरदर्शयत् ॥ २७ ॥
नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने ।
शृङ्गोन्नतौ तु चन्द्रस्य दृक्कर्मादाविदं स्मृतम् ॥ २८ ॥
इति हि प्राह भगवान् दृक्क्रियेऽन्तव्यवस्थिते ? ।
तस्मात्सायनमासे तु तिथिः श्राद्धं न चार्हति ॥ २९ ॥
छायार्कजनितो मासो दृक्सिद्धो न हि वास्तवः ।
तस्मान्निरयने मासि तिथिर्ग्राह्या न चान्यथा ॥ ३० ॥
पितृकार्यं तु सर्वेषां ऋद्धिभाजनमुत्तरे ।
दिवसद्वितये प्राप्ते पूर्वत्र तु कुलक्षयः ॥ ३१ ॥
मासे संवत्सरे चापि तिथिर्द्वैधं यदा भवेत् ।
तत्रोत्तरोत्तमा ज्ञेया पूर्वः स्यात्तु मलिम्लुचः ॥ ३२ ॥
यद्युत्तरा च दुष्टा स्यात्संक्रान्तिग्रहणादिभिः ।
तदा पूर्वा तिथिर्ग्राह्या द्वयोर्दोषे परा मता ॥ ३३ ॥
अर्धरात्रादधस्ताच्चेत् संक्रान्तिग्रहणं तयोः ।
उपाकर्म न कुर्वीतेत्येतन्नीत्या तयोरिह ॥ ३४ ॥

सद्भिर्दोषत्वमुन्नीतं शिष्टनिष्ठानुगामिभिः ।
यस्मिन्नहनि संक्रान्तेः परं मध्यंदिनं भवेत् ॥ ३५ ॥
आब्दिकं तत्र कर्तव्यमन्यथा ग्राह्यमुत्तरम् ।
उभयोः कर्मकालस्य दोषे तुल्ये मनीषिभिः ॥ ३६ ॥

मासंसबन्धभूयस्त्वं यत्र सा गृह्यतां तिथिः ।
यदि स्यादुभयोस्तौल्यं मासंसबन्धतोऽपि च ॥ ३७ ॥
तदा परैव संग्राह्या यथापूर्वमिति स्थितिः ।
प्रागर्द्धरात्रात्परतः संगवाद्यदि संक्रमः ॥ ३८ ॥
स एवं कर्मकालस्य दोष इत्यभिधीयते ।
भुक्तेर्निषिद्धतापि स्यात्कालदोषैः सतां मते ॥ ३९ ॥
अन्नश्राद्धं न निष्पाद्यं यन्न भोजनमन्तरा ।
भुक्तेर्निषेधकाले तु श्राद्धकालो यदा भवेत् ॥ ४० ॥
हेमश्राद्धं तु कर्तव्यमामश्राद्धमथापि वा ।
यद्वा परेद्युः कर्तव्यं दोषापाये क्षपासु वा ॥ ४१ ॥
रात्रावपि क्वचित् शास्त्रे गौणकालस्य कीर्तनात् ।
सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम् ॥ ४२ ॥

चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरान्विना ।
संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ ॥ ४३ ॥
तदहर्नैव भुञ्जीत रात्रावपि कदाचन ।
ग्रस्तोदये विधोः पूर्वं नाहो भोजनमाचरेत् ॥ ४४ ॥
ग्रस्तावेवास्तसंयोगं रवीन्दू प्राप्नुतां यदि ।
परेद्युरुदये स्नात्वा भुञ्जीतेति विनिर्णयः ॥ ४५ ॥
इति वृद्धवसिष्ठाद्यैः भोजनं तु निवारितम् ।
सौरे यत्र दिनं शून्यं तदा चान्द्रविधानतः ॥ ४६ ॥

पूर्वमासे कृतं चेत्स्यात् पितृणां तृप्तिकारकम्।
वृश्चिकादित्रिमासेषु मृताहो न भवेद्यदि ॥ ४७ ॥
पूर्वमासि तिथौ कुर्यान्मासिकं चाब्दिकं तथा।
ऊर्ध्वं मुहूर्तात्कुतपात् संक्रान्तिर्यदि दृश्यते ॥ ४८ ॥
पूर्वे मासि न कर्तव्यं कुर्यात्प्राक्कुतपाद्यदि।
इति व्यवस्थितिं प्राहुः हारीताद्या महर्षयः ॥ ४९ ॥
उभयोर्दिनयोर्व्याप्ता यदि स्यादेकिका तिथिः।
मासिके चाब्दिके चैव तिथिर्ग्राह्यापराह्णिकी ॥ ५० ॥
उभयत्र तथात्वे तु महत्त्वेन विनिर्णयः।
समत्वे पूर्वसिद्धैव ह्यतथात्वेऽपि सा यदि ॥ ५१ ॥
त्रिमुहूर्ता भवेत्सायं सर्वेष्टोऽयं विनिर्णयः।
त्रिमुहूर्ता न चेद्ग्राह्या परैव कुतपे हि सा ॥ ५२ ॥
इति सस्मार भगवान् गोभिलो मुनिसत्तमः।
द्वेधा त्रेधा चतुर्धा च पञ्चधा नवधापि च ॥ ५३ ॥
तथैव पञ्चदशधा दिवसस्य विभक्तयः।
आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः ॥ ५४ ॥
इति स्कान्दपुराणेन दिवसस्तु द्विधाकृतः।
यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते ॥ ५५ ॥
तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते।
इति द्वेधैव मनुना भक्तं भगवता दिनम् ॥ ५६ ॥

'तस्मादहरहः पूर्वाह्णे देवाः अशनमभ्यवहरन्ति मध्यंदिने मनुष्याः अपराह्णे पितरः,। 'पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितृणाम्' इति शातातपेनापि श्रुत्या चापि त्रिधा दिनम्।

विभक्तमेवमेवैतत् चतुर्धा प्राह गोभिलः ।
पूर्वाह्णः प्रहरः पूर्वो मध्याह्नः प्रहरस्ततः ॥ ५७ ॥
अपराह्णस्तृतीयः स्यात्सायाह्नश्च ततः परम् ।
मुहूर्तत्रितयं प्रातः तावानेव तु संगवः ॥ ५८ ॥

मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णोऽपि तादृशः ।
सायाह्नस्त्रिमुहूर्तस्तु सर्वकर्मबहिष्कृतः ॥ ५९ ॥
इति व्यासेन महता विभक्तं पञ्चधा दिनम् ।
प्रातरार्तः संगवश्च रुग्णो मध्याह्नसंतपौ ॥ ६० ॥
अपराह्णः खनिः सायं नवधा भिद्यते त्वहः ।
इत्येवं नवधैकैकं विभक्तं दिनमत्रिणा ॥ ६१ ॥

रौद्रः श्वेतस्तथा मैत्रस्तथा कालकटः स्मृतः ।
सावित्रश्च जयन्तश्च गान्धर्वः कुतपस्तथा ॥ ६२ ॥
रौहिणश्च विरञ्चश्च विजयो नैर्ऋतस्तथा ।
महेन्द्रो वरुणश्चैव बोधः पञ्चदश स्मृतः ॥ ६३ ॥
इत्याह भगवान् शङ्खो दिनं पञ्चदशात्मकम् ।
रौद्रः श्वेतश्च मैत्रश्च तथा सारगतः स्मृतः ॥ ६४ ॥
सावित्रो वैश्वदेवश्च गान्धर्वः कुतपस्तथा ।
रौहिणस्तिलकश्चैव विभागो निर्ऋतिस्तथा ॥ ६५ ॥

शम्बरो विजयश्चैव बोधः पञ्चदश स्मृतः ।
दिवसश्च यदा राम वृद्धिं समधिगच्छति ॥ ६६ ॥
तदाश्रितमुहूर्तानां तदा वृद्धिः प्रकीर्तिता ।
दिनवृद्धिर्य(थ)दा राम तेषां हानिस्तथा भवेत् ॥ ६७ ॥

तदाश्रितमुहूर्तानां हानिर्ज्ञेया तदा तदा ।
इति पञ्चदशानां च मुहूर्तानां यथायथम् ॥ ६८ ॥

वृद्धित्तयादिकं पूर्वैं रन्यत्रापि प्रपञ्चितम् ।
इत्येवं बहुधा भक्ते का वा स्यादपराह्णिकी ॥ ६९ ॥
तिथि श्राद्धेषु विहिता महत्त्वं वा कुतो मतम् ।
द्वेधा विभागपत्ते च दिनार्धव्यापनं यदा ॥ ७० ॥
अधिकं स्यात्तिथेस्तत्र श्राद्धानुष्ठानमापतेत् ।
न चैतद्युज्यते लोके शिष्टाचारविरोधतः ॥ ७१ ॥
अपरार्द्धापराह्णत्वं दिवसस्य मनुस्मृतम् ।
मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते ॥ ७२ ॥
यदि त्रेधा विभागस्य श्रुतिप्रामाण्यगौरवात् ।
शातातपस्मृतत्वाच्च समाश्रयणमिष्यते ॥ ७३ ॥
तथा चाह्नस्तृतीयांशे तिथ्याधिक्यं तु यद्दिने ।
तत्रैव मासिकादीना मनुष्ठानं प्रसज्यते ॥ ७४ ॥
तच्च पूर्ववदेव स्यात् शिष्टगोष्ठीबहिष्कृतम् ।
यदि श्रौतापराह्णादेः स्थूलत्वात्तदपेक्षया ॥ ७५ ॥
अत्युक्तस्यापराह्णस्य सौक्ष्यादादरणं मतम् ।
तत्रापि तुल्य एवायं दोषः पूर्वेषु चोदितः ॥ ७६ ॥
सत्र्यंशैकाधिका नाड्यो यदि पूर्वदिने तिथेः ।
तथा परस्मिन् दिवसे नाड्यः परतिथेरपि ॥ ७७ ॥
तदा पूर्वदिने श्राद्धं कार्यमापद्यते यतः ।
न दृश्यते तथा लोके शिष्टानुष्ठानमञ्जसा ॥ ७८ ॥
परस्मिन्नेव दिवसे सद्भिः श्राद्धं तदादृतम् ।
तस्मात्सर्वेषु पत्तेषु शिष्टाचारविरोधतः ॥ ७९ ॥
स्यात्पञ्चधा विभागस्य ग्राह्यत्वमिति चेत्तदा ।
श्रुतिस्मृतिविरुद्धस्याप्याचारस्य प्रमाणता ॥ ८० ॥

महद्भिरभ्युपेया स्यात्सा च तैरेव नेष्यते ।
इत्येवं बहुधायातैर्दोषैराकुलतां गते ॥ ८१ ॥
सत्कुले च वयं ब्रूमो व्यासपद्धानुधावनात् ।
मनोरापिः यथा यद्वै किंचनेति श्रुतीरिता ॥ ८२ ॥
तथास्यापि स होवाच व्यास इत्यादिनेरिता ।
शिष्टानुष्ठानसहिता व्यासोक्तिस्तु त्रयीमतम् ॥ ८३ ॥
विशेषता व्यनक्तीति नास्य वेदविरुद्धता ।
आधिक्यमपरार्द्धिक्या व्याप्तेर्न श्रुतिचोदितम् ॥ ८४ ॥
किं तु तत्कालसंबन्धमात्रं श्राद्धस्य चोदितम् ।
येनानेन विरोधः स्याच्छिष्टाचारस्य दृश्यताम् ॥ ८५ ॥
किं च श्रुतेः प्रधानाङ्गं ज्यौतिषं वेदलोचनम् ।
प्रबलं चान्तरङ्गत्वात् तत्तत्कालविनिर्णये ॥ ८६ ॥
उक्तः तत्र हि गर्गाद्यैः शिष्टाचारानुरोधतः ।
पञ्चांशतां समालम्ब्य दिनस्य तिथिनिर्णयः ॥ ८७ ॥
अह्नोऽन्त्यांशे द्विधा वेदनिघ्ने पूर्वतिथिं त्यजेत् ।
त्रिघ्नं परतिथौ शोध्यमधिकं यत्र सा तिथिः ॥ ८८ ॥
इति हि ज्यौतिषे शास्त्रे श्राद्धार्हतिथिसाधनम् ।
अह्नश्च पञ्चमो भागः अह्नोऽन्त्यांश इतीरितः ॥ ८९ ॥
द्वेधा स्याप्यः स चांशः स्यादित्यर्थ स्याद्विधापदम् ।
गुण्यश्चतुर्भिस्तत्रैक इत्युक्ता वेदनिघ्नता ॥ ९० ॥
शिष्टं स्पष्टं हि निगदव्याख्यातत्वेन धीमताम् ।
एवं ज्यौतिषशास्त्रोक्तवर्त्मना श्राद्धमाचरेत् ॥ ९१ ॥
तस्यैव कालनिर्णीतावैदंपर्यं विदन् बुधः ।
तस्मादहनि पञ्चांशे तुर्ये यत्राधिका तिथिः ॥ ९२ ॥

सैवापराह्णिकी वेद्या महत्त्वमपि तद्भवम् ।
उभयत्र तथात्वे तु महत्त्वेन विनिर्णयः ॥ ९३ ॥
पञ्चभागेषु तुर्याङ्गी तिथियोगेन नीयताम् ।
अधिकं त्वत्र वक्तव्यमन्यत्रैव प्रपञ्चितम् ॥ ९४ ॥

इदं तु सुखबोधायेत्यास्तां सर्वं समञ्जसम् ॥
इति कौशिकगोत्रेण श्रीगोविन्दाचार्यसूनुना ।
श्रीवेंकटेशपादाब्जसमाराधनकारिणा ॥
तद्दत्तवेदवेदान्तदेशिकाख्येन धीमता ।
सर्वतन्त्रस्वतन्त्रेण गर्भचक्राङ्कजन्मना ॥
श्रीवैखानसनिष्ठेन श्रीनिवासाख्ययज्वना ।
रचिता परिपूर्णेयं तिथिनिर्णयकारिका ॥

दीक्षितीया तिथिनिर्णयकारिका
संपूर्णा ॥


* राजकीय *
संस्कृत-पाठशाला
नेपाल